# Question Paper Code : 7281

**M.A. (Semester-III) Examination, 2017**

( वर्ग-ख साहित्यम् )

## संस्कृतम्

**[ Third Paper ]**

( ऐतिहासिक महाकाव्यं अभिलेखश्च )

समयः - घण्टात्रयम् सम्पूर्णाङ्काः - 70

**नोट** : पञ्च प्रश्नाः समाधेयाः। प्रथमः प्रश्नोऽनिवार्यः। प्रतिवर्गात् एकैकः प्रश्नश्चावश्यं समधेयः। सर्वे प्रश्नाः समानाङ्काः।

1. लघूत्तराणि विलेख्यानि : [3×10=30]

(क) कंसरिपोः कृपाणः।

(ख) गुरुड़ध्वजस्य वक्षःस्थली।

(ग) सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कविता विलासाः।

(घ) न कोपनीयः कवयः क्षितीन्द्रैः।

(ङ) महाकविबाण भट्टः।

(च) हरलीलेव नो कस्य विस्मयाय बृहत्कथा।



http://www.lucknowstudy.com

(छ) नमः सर्वविदे तस्मै व्यासाय कविवेधसे।

चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम्।।

(ज) क्षमा हि मूलं सर्वतपसाम्।

(झ) सतां हि प्रियंवदता कुलविद्या।

(ञ) विकटादरबन्धश्च कृत्स्नमेकत्र दुर्लभम्।

## प्रथमो वर्गः

2. अधोलिखितयोः द्वयोः व्याख्या करणीया : [10]

(क) ततो 'मर्षय भगवन्, अभूमिरेषा शापस्य' इत्यनुनाध्यमानोऽपि विबुधैः, 'उपाध्याय। स्खलितमेकं क्षमस्व' इति बद्धाञ्जलिपुटैः प्रसाद्यमानोऽपि स्वशिष्यैः, 'पुत्र, मा कृथास्तपसः प्रत्यूहम्' इति निवार्यमाणोऽप्यत्रिणा, रोषावेशविवशों दुर्वासाः 'दुर्विनीते! व्यपनयामि ते विद्याजनितामुन्नतिमिमाम्, अधस्ताद् गच्छ मर्त्यलोकम्' इत्युक्त्वा तच्छायोदकं विससर्ज। प्रतिशापदानोद्यतां सावित्रीम् 'सखि, संहर रोषम्, असंस्कृतमतयोऽपि जात्यैव द्विजन्मानो माननीयाः' इत्यमिदधाना सरस्वत्येव न्यवारयत्।

(ख) अन्येद्युरुदिते भगवति त्रिभुवन शेखरे खणखणायमान - स्खलत्खलीनक्षतनिज तुरग मुख क्षिप्तेन क्षतजेनेव पाटलिनवपुष्युदयाचल चूडामणौ जरत्कृकवाकुचूडारुणा - रुणपुरःसरे विरोचते नातिदूरवर्ती विविच्य पितामहविमान -



हंसकुलपालः पर्यटन्न परवक्त्र मुच्चैरगायत् - 'तरलयसि दृशं किमुत्सुकामकलुषमानसवास ललिते। अवतर कलहंसि वापिकां पुनरपि यास्यसि पङ्कजालयम्।। तच्छ्रुत्वा सरस्वती पुनरचिन्तयत् - 'अहमिवानेन पर्यनुयुक्ता।

3. अधोलिखितयोः द्वयोर्व्याख्या विधेया : [10]

(क) अथ तां च तथा शप्तां सरस्वती दृष्ट्वा पितामहो भगवान्कमलोत्पत्ति लग्नमृणालसूत्रामिव धवलयज्ञोपवीतिनीं तनुमुद्वहन्, उद्गच्छ दच्छाङ्गुलीयमरकतमयूख लताकलापेन त्रिभुवनोपटलव प्रशमकुशापीऽधारिणेव दक्षिणेन करेण निवार्य शापकलकलम्, अतिविमल दीर्घै भाविकृतयुगारम्भ - सूत्रपातमिव दिक्षु पातयन् दशन किरणैः सरस्वती प्रस्थान- मङ्गलपटहेनेव पूरयन्नाशाः, स्वरेण सुधीरमुवाच - 'ब्रह्मन्, न खलु साधुसेवितोऽयं पन्थाः येनासि प्रवृत्तः। निहन्त्येष परस्तात्।

(ख) अथ सारस्वतो मातुर्महिम्ना यौवनारम्भ एवाविर्भूताशेष - विद्यासंभारस्तस्मिन्सवयसि भ्रातरि प्रेयसि प्राणसमे सुहृदि वत्से वाङ्मयं समस्तमेव संचारयामास। चकार च कृतदार परिग्रहस्यास्य तस्मिन्नेव प्रदेशे प्रीत्या प्रीतिकूटनामानं निवासम्। आत्मनाप्याषाढी, कृष्णाजिनी, अक्षवलयी, वल्कली, मेखली, जटी च भूत्वा तपस्यतो जनयितुरेव जगामान्तिकम्।



http://www.lucknowstudy.com

## द्वितीयो वर्गः

4. अधोलिखितयोः पद्ययोः सन्दर्भपुरस्सरं व्याख्या विधेया : [10]

(क) अशेषविघ्नप्रतिरोधदक्ष-मन्त्राक्षतानामिव दिङ्मुखेषु।
विक्षेपलीलाकरशीकराणां करोतु वः प्रीतिमिभाननस्य।।

(ख) कर्णामृतं सूक्तिरसं विमुच्य दोषे प्रयत्नः सुमहान् खलानाम्।
निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टक जालमेव।।

5. अधोलिखितयोः पद्ययोः ससन्दर्भ व्याख्या करणीया : [10]

(क) प्रसाध्य तं रावणमध्युवास यां मैथिलीशः कुलराज धानीम्।
ते क्षत्रियास्ताभवदातकीर्तिः पुरीमयोध्यां विदधुर्निवासम्।।

(ख) एषास्तु चालुक्यनरेन्द्रवंश समुद्गतानां गुणमैक्तिकानाम्।
मद्भारतीसूत्रनिवेशितानामेकावली कण्ठविभूषणं वः।

## तृतीयो वर्गः

6. अधोलिखितयोः द्वयोः व्याख्या कार्या : [10]

(क) महाक्षत्रपेण रुद्रदाम्ना वर्षसहस्राय गोब्राह्मणार्थं धर्मकीर्ति - वृद्ध्यर्थं चापीडयित्वा करविष्टिप्रणयक्रियाभिः पौरजानपदं जनं स्वस्मात्कोशान्महता धनौघेनानतिमहता च कालेन त्रिगुणदृढ़तरविस्तारायामं सेतुं विधाय सुदर्शनतरं कारितम्।



(ख) तदनु जयति शश्वत् श्री परिक्षिप्तवक्षाः
स्वभुजजनितवीर्यो राजराजाधिराजाः।
नरपतिभुजगानां मानदर्पोत्फणानां
प्रतिकृतिगरुड़ाज्ञां निर्विषीं चावकर्ता।।

7. निम्नाङ्कितयोः द्वयोः व्याख्या विधेया : [10]

(क) तस्मिन्नृपे शासति नैव कश्चित् धर्मादपेतो मनुजः प्रजासु।
आर्तो दरिद्रो व्यसनी कदर्यो दण्ड्यो न वा यो भृशपीडितः स्यात्।।

(ख) नियुज्य देवा वरुणं प्रतीच्यां स्वस्था यथा नोन्मनसो बभूवुः।
पूर्वेतरस्यां दिशि पर्णदत्तं नियुज्य राजा धृतिमांस्तथाभूत्।।

## चतुर्थो वर्गः

8. स्कन्दगुप्तस्य जूनागढ़ प्रस्तराभिलेखस्य महत्वं प्रतिपादनीयम्। [10]

9. इतिहासदृष्ट्या महाकविबिल्हणस्य अवदानं समीक्षणीयम्। [10]

----- x -----



http://www.lucknowstudy.com